झनत्कारः, पुं, (झन्+भावे घञ् कारः । झनदित्यव्यक्तशब्दस्य कारः करणं यत्र ।) अनुकरणशब्दः । कङ्कणादिध्वनिः । यथा, कालिदासः ।
"उद्वेलद्भुजवल्लिकङ्कणझनत्कारः क्षणं वार्य्यताम् ॥"

झम, उ भक्षे । इति कविकल्पद्रुमः । (भ्वां-परं-सकं-सेट् । उदित्वात् क्त्वावेट् ।) उ, झमित्वा झान्त्वा । इति दुर्गादासः ॥

झम्पः, पुं, (लम्फः पृषोदरादित्वात् साधुः ।) सम्पातपतनम् । लम्फः । इति जटाधरः ॥ (यथा, महावीरचरिते ।
"पुच्छास्फोटदलत्-समुद्रविवरैः पातालझम्पाश्च [ताः ॥")

झम्पारुः, पुं, (झम्पं लम्फं आराति आददातीति । आ+रा+बाहुलकात् उः ।) वानरः । इति शब्दरत्नावली ॥

झम्पाशी, [न्] पुं, (झम्पेन सम्पातेन अश्नातीति । अश+णिनिः । मत्स्यादिधारणकाले झम्पदानपूर्ब्बकपतनादस्य तथात्वम् ।) मत्स्यरङ्गपक्षी । इति जटाधरः ॥

झम्पी, [न्] पुं, (झम्पो लम्फोऽस्यास्तीति । झम्प+"अत इनिठनौ ।" ५ । २ । ११५ । इति इनिः ।) वानरः । इति शब्दरत्नावली ॥

झरः, पुं, (झीर्य्यति जीर्णीभवति पतनादिस्थानमनेनेति । झॄ+"ऋदोरप् ।" ३ । ३ । ५७ । इत्यप् ।) निर्झरः । पर्व्वतावतीर्णजलप्रवाहः । इत्यमरः । २ । ३ । ५ ॥ (समूहः । यथा, नैषधे ।२।३२ ।
"कलसे निजहेतुदण्डजः
किमु चक्रभ्रमिकारिता गुणः ।
स तदुच्चकुचौ भवन् प्रभा-
झरचक्रभ्रमिमातनोति यत् ॥"
"स कलसः प्रभारूपेण कान्तिसमूहेन चक्रभ्रमिं कुलालचक्रभ्रमणमातनोति जनयति । यद्वा प्रभाझरे कान्तिप्रवाहे चक्रभ्रमिं चक्रवाकभ्रान्तिमातनोति ।" इति तट्टीका ॥)

झरा, स्त्री, (झर+टाप् ।) झरः । इत्यमरटीकायां भरतः ॥

झरी, स्त्री, (झर+ङीष् ।) झरः । इत्यमरटीकायां भरतः ॥

झर्च, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) रेफोपधः । श, झर्चती झर्चन्ती । गुणस्थानरहितानां तुदादिपाठफलन्तु शत्रन्तानामादीपोरिति तुमो विभाषा वैदेषूचारणभेदश्च । भर्त्सस्तर्ज्जनम् । इति दुर्गादासः ॥

झर्च्छ, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, झर्च्छती झर्च्छन्ती । भर्त्सस्तर्ज्जनम् । इति दुर्गादासः ॥

झर्झ, श उक्तौ । भर्त्से । इति कविकल्पद्रुमः ॥ (तुदां-परं-सकं-सेट् ।) श, झर्झती झर्झन्ती । भर्त्सस्तर्ज्जनम् । इति दुर्गादासः ॥

झर्झरः, पुं, (झर्झ इत्यव्यक्तशब्दं रातीति । रा+कः । यद्वा, झर्झति शब्दायते इति । झर्झ+बहुलवचनात् अरः ।) वाद्यविशेषः । इत्यमरः । १ । ७ । ८ ॥ चर्म्मपुटाच्छादितकाष्ठस्थानम् । इति तट्टीकासारसुन्दरी ॥ करड़ इति ख्यातः ।
"हिण्डिमो डिङ्गरी प्रोक्तो झर्झरः पटहः स्मृतः ॥"
इति भरतधृतवैकुण्ठः ॥
तत्पर्य्यायः । झल्लकी २ झल्ली ३ झलरी ४ झझरी ५ । इति शब्दरत्नावली ॥ (यथा, हठयोगप्रदीपिकायाम् । ४ । ८५ ।
"आदौ जलधिजीमूतभेरीझर्झरसम्भवाः ॥"
झर्झ्यते निन्द्यते इति । झर्झ भर्त्से+अरः ।) कलियुगम् । (झर्झरो झर्झरशब्द इवास्त्यस्येति । अच् ।) नदभेदः । इति मेदिनी । रे, १५८ । (हिरण्याक्षपुत्रविशेषः । यथा, हरिवंशे । ३ । ७६ ।
"हिरण्याक्षसुताः पञ्च विद्वांसः सुमहाबलाः ।
झर्झरः शकुनिश्चैव भूतसन्तापनस्तथा ।
महानाभश्च विक्रान्तः कालनाभस्तथैव च ॥")

झर्झरकः, पुं, (झर्झर+स्वार्थे कन् ।) कलियुगम् । इति त्रिकाण्डशेषः ॥

झर्झरा, स्त्री, (झर्झ्यते निन्द्यते इति । झर्झ भर्त्से+बाहुलकात् अरः । ततष्टाप् ।) वेश्या । इति त्रिकाण्डशेषः ॥ (जलशब्दविशेषः । यथा, काशीखण्डे । २६ । ९८ ।
"झिण्टीशवन्द्या झाङ्कारकारिणी झर्झरावती ॥")

झर्झरी, स्त्री, (झर्झर+गौरादित्वात् ङीष् ।) झर्झरवाद्यम् । इति शब्दरत्नावली ॥ (यथा, हरिवंशे । २३७ । २ ।
"गोमुखाडम्बराणाञ्च भेरीणां सुरजः सह ।
झर्झरीडिण्डिमानाञ्च यश्रूयन्त महास्वनाः ॥")

झर्झरीकः, पुं, (झर्झतीति । झर्झ+"फर्फरीकादयश्च ।" उणां । ४ । २० । इति ईकन्प्रत्ययेन निपातनात् साधुः ।) शरीरम् । इत्युणादिकोषः ॥ देशः । चित्रम् । इति संक्षिप्तसारे उणादिवृत्तिः ॥

झलज्झला, स्त्री, (झलज्झल इत्यव्यक्तशब्दोऽस्त्यस्येति । अच् ।) हस्तिकर्णास्फालनम् । इति त्रिकाण्डशेषः ॥

झलरी, स्त्री, (झल्लरी । पृषोदरादित्वात् लकोपः ।) हुडुकः । झर्झरवाद्यम् । वालचक्रम् । केशचक्रम् । इति मेदिनी । रे, १५६ ॥

झला, स्त्री, कन्या । आतपस्योर्म्मिः । इति मेदिनी । ले, २० ॥

झल्लः, पुं, वर्णसङ्करजातिविशेषः । इति जटाधरः ॥ स क्षत्रियात् व्रात्यात् सवर्णायां जातः । (यथा, मनुः । १० । २२ ।
"झल्लो मल्लश्च राजन्यात् व्रात्याल्लिच्छिविरेव च ॥")
प्रहासकः । इति महाभारतम् ॥ भाँड़ इति भाषा ॥ (क्ली, झर्झरवाद्यम् ॥)

झल्लकं, क्ली, (झल्ल+स्वार्थे कन् ।) कांस्यनिर्म्मितकरतालकम् । यथा, तिथ्यादितत्त्वे ।
"शिवागारे झल्लकञ्च सूर्य्यागारे च शङ्खकम् ।
दुर्गागारे वंशिवाद्यं मधुरीञ्च न वादयेत् ॥"

झल्लकण्ठः, पुं, (झल्लो झल्लकशब्द इव कण्ठः कण्ठस्वरो यस्य ।) पारावतः । इति हारावली । ८७ ॥

झल्लरी, स्त्री, (झल्लं झल्लकशब्दं रातीति । रा+कः । स्त्रियां ङीष् ।) हुडुकः । झर्झरवाद्यम् । (यथा, काशीखण्डे । २६ । ९८ ।
"झल्लरीवाद्यकुशला झलज्झालजलावृता ॥")
वालचक्रम् । वावड़ीति ख्यातम् । इति मेदिनी । रे, १५६ ॥ शुद्धम् । क्लेदः । इत्यजयपालः ॥

झल्लिका, स्त्री, (झल्लीव कायतीति । कै+कः । पृषोदरादित्वात् साधुः ।) उद्वर्त्तनपटः । द्योतः । इति मेदिनी । के, ६६ ॥ उद्वर्त्तनमलम् । इति शब्दरत्नावली ॥

झल्ली, स्त्री, (झल्ल+ङीष् ।) झर्झरवाद्यम् । इति शब्दरत्नावली ॥

झल्लीलः, पुं, (झर्झ क्विप् तादृशः सन् लीलः । ततः पृषोदरादित्वात् साधुः ।) तर्कुलासकः इति हारावली । २१३ ॥ टेकुयार वाँटुल इति भाषा ॥

झष, वधे । इति कविकल्पद्रुमः ॥ (भ्वां-परं-सकं-सेट् ।) आद्यस्वरी । झषति । षष्ठस्वरी चायमिति केचित् । झूषति । इति दुर्गादासः ॥

झष, ञ ग्रहे । पिधाने । इति कविकल्पद्रुमः ॥ (भ्वां-उभं-सकं-सेट् ।) ञ, झषति झषते वस्त्रं जनो गृह्णाति परिदधाति वेत्यर्थः । सप्तमस्वरादिरयमिति पूर्णचन्द्रत्रिलोचनरामाः । अषति अषते । इति दुर्गादासः ॥

झषं, क्ली, (झष ग्रहे+अच् ।) खिलम् । इत्यजयपालः ॥

झषः, पुं, (झष्यते वध्यते भक्षणाय झष्यते गृह्यते इति वा । झष+"खनो घ च ।" ३।३।१२५। इति घ ।) मत्स्यः । इत्यमरः । १ । १० । १ ॥ (यथा, भगवद्गीतायाम् । १० । ३१ ।
"झषाणां मकरश्चास्मि स्रोतसामस्मि जाह्नवी ॥")
मकरः । यथा, रामायणे । २ । ११४ । ४ ।
"नीनमीनझषग्राहां कृशां गिरिनदीमिव ॥")
तापः । वनम् । इति मेदिनी । षे, १२ ॥ मीनराशिः । यथा,—
"साहंसप्तझषे मेषे वसुसार्द्धो घटे वृषे ॥"
इति समयप्रदीपः ॥

झषकेतनः, पुं, (झषो मकरो मीनो वा केतनं केतुरस्य ।) कन्दर्पः । इति हलायुधः ॥

झषा, स्त्री, (झष्+अच् ततष्टाप् ।) नागबला । इत्यमरः । २ । ४ । ११७ ॥

झषाङ्कः, पुं, (झषः अङ्को यस्य ।) अनिरुद्धः । इति हेमचन्द्रः ॥ (कन्दर्पः । यथा, श्रीकण्ठचरिते । ११ । २ ।
"यत्कला किल झषाङ्कपुलिन्द-
स्पन्दमानवडिशव्रतमाधात् ॥")

झषाशनः, पुं, (झषान् मत्स्यान् अश्नातीति । अश् श भोजने+कर्त्तरि ल्युः ।) शिशुमारः । इति त्रिकाण्डशेषः ॥